ISSN : 2581-6675

PIJSSL

# Praxis International Journal Of Social Science and Literature

*(A Monthly Research Journal Published in English, Hindi and Urdu)*

| | |
|---|---|
| **Refereed Journal** | **Peer Reviewed Journal** |
| **Indexed Journal** | **Online Journal** |

**Vol - 1** **Issue - 9** **November - 2018**

## Editor

**Anish Kumar**

Website : www.pijssl.com
Email : editor.pijssl@gmail.com

# शब्दब्रह्म युगे युगे

**सत्यव्रतनन्दः**
(शोधच्छात्रः), राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, भारतः

*"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्"* इति शब्दब्रह्मस्वरूपस्य वेदस्य आकालोपस्थितिः विज्ञायते । महद्दिव्यब्रह्मयज्ञकृतवद्भिः प्राच्यपाश्चात्यविद्वद्भिः शब्दब्रह्मस्वरूपस्य वेदस्य सर्वविधतात्त्विका-र्थानां विज्ञापकत्वे बहुत्र प्रार्थना कृता वर्तते । अधुना *"अपौरुषेयं वाक्यं वेद"* इत्यपौरुषेयस्य वेदस्य प्रशस्तदिव्यमार्गाधारेण नैकैरुपदेशयानैः ज्ञानविनोदनाय शब्दतत्त्वविमर्शणं कुर्मः। आलङ्कारिकाः सर्वदा काव्यस्याह्लादमयत्वमिति प्रकथयन्तः तत्र वेदोपनिषदादीनां युगे युगे कटुकषायौषधादिवत् अभिप्रयन्ति -

**कटुकषायवच्छास्त्रमविद्याव्याधिनाशनम् ।**
**आह्लादामृतवत्काव्यमविवेकीगदापहम् ।।**[1]

वस्तुतः संस्काररूपेण शब्दा अस्माकं मनसि तिष्ठन्ति । यस्मात् उच्चारितस्य स्फोटस्य तत्क्षणादेव विलुप्ते सति तदवबुध्यते ।

**परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।**
**वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ।।**[2]

अर्थात् कुण्डलिन्यां स्थितो यो वायुः संस्कारभूतः; तेन वाणी संस्कृतेनाभिव्यञ्जिता, यद्यपि परा शब्दब्रह्मरूपा, सर्वगतास्ति तथापि प्राणिनां मूलाधारे कुण्डलिन्यां संस्कृतपवनचलनेनाभिव्यज्यते । स एव शब्दः यदा बाह्याभ्यन्तरकृतप्रयत्नेन अस्मद्गह्वरस्थानेभ्यः निःसरति तदा क्रान्तदर्शिनः कवयः "प्रज्ञा प्रतिभा मता[3]" इति गरिमां प्रशाशंस्यन्ते । आलङ्कारिकैश्च स स्फोटविशेषो "ध्वनति अर्थयतीति ध्वनिः[4]" पदेन अभिव्यज्यते । बुधाः तस्य शब्दस्य स्फोटः, ध्वनिरिति द्विविधत्वस्वीकारे केचन पश्यन्तीवाणीं परंब्रह्मेति निगदन्ति । उदयनाद्याश्च अस्माच्छब्दादयमर्थो बोधव्य इति ईश्वरशङ्केतः शक्ति इति निर्विकारस्य सच्चिदानन्दस्वरूपस्य ब्रह्मणः मायाशक्तिरिव शब्दब्रह्मणः पदपदार्थयोः सम्बन्धशक्तेः अभिधा-लक्षणा-व्यञ्जनेति त्रैविध्यमुपदिश्य तच्छक्तिग्रहस्योपायान् व्यक्तीकुर्वन्ति-

---

[1] कुन्तकाचार्येण काव्यप्रयोजने यत्नमुद्दिश्य विचार्यते ।

[2] पाय्वाङ्गाद्द्वयाङ्गुलादूर्ध्वं लिङ्गाच्च द्वयङ्गुलादयः। मध्यमेकाङ्गुलं यच्च देहमध्यं प्रचक्षते।।

[3] द्वितीयवाग्भट्टस्य काव्यकारणे ।

[4] ध्वन्यालोके ध्वनिसिद्धान्ते ।

**शक्तिग्रहं व्याकरणोपमान कोशाप्तवाक्याद्व्यवहारतश्च।**

**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**

सैषा शक्तिः संयोगादिभिर्नानार्थेषु नियम्यते –

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।**

**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।**

**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**

**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ।।**[5]

तच्छक्तिग्राहकस्य शब्दस्य मूलशब्दः, शङ्केतनिष्ठश्चेति द्विविधत्वमङ्गीक्रियते। यथा ऋग्वेदे -

**चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।**

**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।**[6]

**बृहस्पते प्रथमं वाचो अग्रं यत् प्रैरत नामधेयं दधानाः।**

**यदेषां श्रेष्ठं यदारिप्रमासीत् प्रेणा तदेषां निहितं गुहाविः।।**[7]

मानवाः सङ्केतनिष्ठां भाषां व्याहरन्ति । छन्दोवद्धा वेदमयी दिव्या वाग् एतद्विलक्षणा । यस्यां भाषायां शब्दस्य अर्थेन सम्बन्धो नित्यसिद्धो वर्तते सा वेदभाषा, दिव्या वाक् मूलवाणीपदवाच्या । अत एव वेद मूलध्वनिपदवाच्यः। कोऽसौ मूलध्वनिरित्याशङ्कासमापत्तौ आह योगरूढानां समाधिस्थानां निर्विकल्पके महर्षिणां या नित्या दिव्या वाणी बुद्धिस्था आसीत् यस्यां शब्दार्थसंप्रतिपत्तिराविर्भवति सा वाणी मूला वाणी वेदवाणी इत्यवधेया । एवं वेदस्यायं स्वभावो यदुच्चार्यमाणे शब्दे सति अर्थसम्पादनं तदङ्गभूतमिवानुभूयते । लौकिकानां प्रवर्तनविशेषाणां पुरुषधर्मत्वेन शब्दनिष्ठत्वायोगात् मीमांसकाः शब्दनिष्ठस्वीकारे भावनातत्त्वमङ्गीकृत्य शाब्दिभावनामित्थं लक्षयन्ति- तत्र पुरुष प्रवृत्त्यनुकूलभावकव्यापारविशेषो शाब्दीभावना । सा च लिङ्त्वांशेनोच्यते । किं बहुना, लिङ् श्रवणे, अयं मां प्रवर्त्तयति मत्प्रवृत्त्यनुकूलव्यापारवानयम्, इति नियमेन प्रतीयमानहेतोः। यच्च यस्मात् प्रतीयते तत्तस्य वाच्यम्, यथा गो शब्दस्य गोत्वम् इति । पुनरेतस्य लोकव्यवहारजिज्ञासायाम् आह स च प्रवृत्त्यनुकूलव्यापारविशेषो लोके पुरुषनिष्ठोऽभिप्रायो विशेषः, वेदे तु पुरुषाभावात् लिङ्गादिशब्दनिष्ठ एव ।[8] एवमेवात्र वैदिकलौकिक इति शब्दस्य द्वैविध्यालोचिते तत्र शब्दनिष्ठस्य वैदिकशब्दस्यैव गतकल्पीयमविच्छिन्नं निरन्तरव्यावर्तमानत्वं च सिद्ध्यति। ब्रह्म आदिकालात् अद्यावधि बहुकालविगते कुत्रापि वेदमन्त्राणां, तत्र स्थितपदानां वर्णमात्रास्वराणां वा व्यतिक्रमो नास्ति कुटस्थत्वात् नित्यत्वाच्च । नास्ति च कुत्र त्रुटेः आशङ्का, वृद्धिक्षयपदपरिवर्तनपाठान्तरञ्च महाभारतादिवत्। अनया लौकिकावधारणया हि स्पष्टीयते वेदस्य नित्यत्वमपौरुषेयत्वञ्चेति ।

---

5 वाक्यपदीयम्.2.317-318

6 ऋग्वेदः. 1.164.45

7 ऋग्वेदः. 10.21.1

8 मीमांसान्यायप्रकाशः, शाब्दीभावनानिरूपणम्

वेदशब्देभ्यो देवादिकं जगत्प्रभवतीति श्रीमच्छङ्कराचार्यैः प्रतिपादितम् । यदि विषयममुं श्रीजगन्नाथसंस्कृतिपद्धत्या समीक्षामहे चेद् भगवतः श्रीविग्रहस्य नवकलेवरोपस्थिते यदा भक्तसेवकैः बहु दिनव्यापिनीसेवितानां लीलाविग्रहाणां दारूमूर्त्तितः ब्रह्मतत्त्वमानीय यज्ञानुष्ठानादिसंस्कारिते नूतनदारुविग्रहे संस्थापनमिति तात्त्विकं नवकलेवरानुष्ठानसम्पादनं भवति तथैव कृतद्वापरादि एकसहस्रमहायुगसमन्विते सम्पूर्णेऽस्मिन् कल्पे व्यतीतानां प्रचलितानां च विविधाज्ञापक-ज्ञापकालौकिकशक्तिस्वरूपकं शब्दब्रह्म अस्मात् कल्पात् स्वीकृत्य कल्पान्तरे अभिधानात्मिकेयं नवकलेवरप्रक्रिया प्रचलतीति प्रच्छदपटं समर्थयति न्यायमार्गोऽयं –

यः कल्पः स कल्पपूर्वः[9] इति संसारस्य अनादीश्वरस्य च सर्वज्ञत्वात् अचिन्त्यशक्तित्वाच्च ईश्वरो गतकल्पीयं वेदमस्मिन् कल्पे स्मृत्वा उपदिशति इति एतावता ज्ञानमवश्यमङ्गीकर्तव्यं यत् शब्दब्रह्मणः (वेदस्य) युगे युगे नित्य-शाश्वत-चिरन्तनत्वञ्चेति । व्यासोऽपि स्मरति -

**युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।**

**लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ।।**[10]

“अत एव च नित्यत्वम्”।[11] सूत्रस्यास्य व्याख्यातारः श्रीमच्छङ्कराचार्याः लिखन्ति स्म – “स्वतन्त्रस्य कर्तुरस्मरणादिभिः स्थिते वेदस्य नित्यत्वम् । अतएव नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवकत्वाद्वेदशब्दे नित्यत्वमपि प्रत्येतव्यम्” इति । तस्मादुच्यते -

**वेदाः प्रमाणं लोकानां न वेदाः पृष्ठतः कृता ।**

**द्वे ब्रह्मणि वेदितव्ये शब्दब्रह्म परं च तत् ।।**[12]

मनुष्यदेहः प्रतिबन्धकारणम्। एकतो देहावच्छिन्नजीवः, अपरञ्च अनन्तमपारं विश्वम् । यस्मिन् विश्वे जीव उत्पन्नस्तस्य विश्वस्य घटक एव जीवः । अतः पिण्डब्रह्माण्डयोरैक्यप्रतिपत्तिपरत्वमेव मानवदेहस्य ग्राह्यम् । परन्तु मानवदेहस्तदङ्गभूतान्तःकरणवृत्तिप्रपञ्चः संवृतत्वेन हेतुना निवार्यते तादृशमैक्यम् । सर्वोऽपि जन्तुर्देहेनैव निमित्तभूतेन सुखदुःखानि अनुभवति । पिण्डब्रह्माण्डयोरैक्यमपि देहद्वारैव भवितुमर्हति ? अत्र शरीरस्य तादृशी एकत्वानुकूला साधनीया । यथा मृदङ्गवादकः प्रथमं मृदङ्गघातप्रत्याघातैर्वादनानुकूलसमतां नयति, तथा शरीरस्यापि कापि साम्यावस्था भवितुमर्हति यस्याम-वस्थायां प्राप्तायामुच्चार्यमाणः शब्दोऽर्थमुत्पादयेत् । अत एव प्राणायामपरायणा भवन्ति मुनयः सर्वे। प्राणस्य शब्दस्य चातीव निकटः सम्बन्धः।

**ऋतं च सत्यं चाभिधात्तपसोऽध्यजायत ।**[13]

अनेन मन्त्रेण तपः पूर्वकं ऋतस्य सत्यस्य सर्जनं प्रतिपादयति वेदः। वेदेषु सर्वत्र शब्दार्थयोरभेदः स्वीकृतः। अतो वेदानां सम्यगुच्चारणे अभिनिवेशो वैदिकानाम् । यदि वेदोच्चारणे प्रमादो भवति तर्हि इष्टहानिरनिष्टलाभश्च चिन्तनीयः। वेदस्य मूलध्वनिरूपत्वात्सम्यगुच्चारणं सुतरामावश्यकम् । अर्थस्य पूर्णत्वं

---

9 वेदापौरुषेयम्, मीमांसान्यायप्रकाशः

10 महाभारत, शान्तिपर्व.197.19,pg-1111.

11 ब्रह्मसूत्रम्.1.3.29

12 महाभारत,शान्तिपर्व.170.1

13 ऋग्वेदः.10.190.1

साधुत्वं च मन्त्रस्य सम्यगुच्चारणे हि प्रतिष्ठितम् ।एवं सति विना अर्थज्ञानमपि कामं जनयतु फलनिष्पत्तिः, शब्दोच्चारणसाधुत्वे सति ।स्मारयति भर्तृहरेरियमुक्तिः –

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।**[14]

अन्यच्च शब्दस्यार्थेन सम्बन्धो नित्य इति जैमिनिः सूत्रं प्रणिनाय।[15] महाभारते शान्तिपर्वणि[16] व्यासमहर्षेरिदं वचनम् -

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।**

**आदौ वेदमयी दिव्या ततः सर्वा प्रवृत्तयः।।**

**नामरूपं च भूतानां कर्मणां च प्रवर्तनम् ।**

**वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः।।**

उपरिनिर्दिष्टेभ्यो महर्षिणां वचनेभ्य इदं सुस्पष्टं भवति यदयं शब्दब्रह्मरूपो वेदः केवलं युगे युगे न, अपि तु अनादिनिधनवत्सर्वकालं नित्यः स्थिर उपदेशपरो वर्तत इति विवेकः। '*सिद्धे शब्दार्थसम्बन्धे* 'इति कात्यायनीयोक्तिः 'सिद्धे' पदयोगेन स्मायरति वेदस्य आकाल कल्याणसाधकत्वम्। (म.भा. शब्दार्थसम्बन्धः)

**एकस्य सर्ववीजस्य यस्य चेयमनेकधा।**

**भोक्तृभोक्तव्यरूपेण भोग्यरूपेण च स्थितिः।।**[17]

अर्थात्सर्ववीजस्य यस्य एकस्य ब्रह्मणः तत्त्वान्यत्वाभ्यामनिर्वाच्या वक्तुमशक्या शक्तिरूपा भोक्तृभोक्तव्यरूपेण सुखदुःखादिभोग्यरूपेण च लोकव्यवहाराय प्रवर्तते । स च वेदः एकोऽपि सन् महर्षिभिः ऋग्यजुसामाथर्वेति पृथक् पृथग् भेदेन चतुर्विध इव भवति ।

**भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता ।**
**शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते।।**[18]

तत्तद्वेदगतशाखानां बहवः पदक्रमजटामालाशिखारेखादयो मार्गा अभ्यासोपायाः, येषाम् अङ्गता एककर्मबोधकत्वं वर्तते । ननु यजुर्वेदगतकाण्वमाध्यन्दिनकाठकादिशाखासु विहितस्य दर्शपूर्णमासाख्यस्य कर्मण एकत्वं न सम्भवति, एकस्यां शाखायां विहितस्य शाखान्तरे पुनर्विधाने तद्विधेरज्ञातज्ञापकत्वाभावेनानर्थक्यापत्या तत्तत्कर्मविधायकवाक्यानां तत्तच्छाखाध्यायिपुरुषसमवेत-बोधजनकत्वं दृश्यते । सम्प्रति एकत्विनां द्वैतीनां प्रवादा बहुधा मता इत्यस्मदध्ययनदशायां बहुविधाया विद्याया, बहुशाखायाः, नैकेषां शास्त्राणाञ्च समुपागते तत्र तावत् कः श्रेयोपायः कश्च उपास्यमार्गः सत्य इत्येषा

---

14 वाक्यपदीयम्,1.13

15 जैमिनीसूत्र. 7.7.5

16 232.14

17 वाक्यपदीयम्.1.5

18 वाक्यपदीयम्.1.6

महती समस्या कालक्रमेण वरीवृध्यते । यदि एते दर्शनभेदाः विद्याभेदा आग्रहैकशरणपुरुषबुद्धिप्रभवा अन्यथायोज्यमानश्रुतिमूला परस्परविरुद्धाश्च तर्हि असत्या एव वस्तुनि विकल्पाभावात्किं सत्यमित्यत आह-

**विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः।**

**विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः ।।**

**सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।**

**युक्ता प्रणवरूपेण सर्ववादविरोधिनी ।।**[19]

उपदेष्टृत्वेन सर्वव्यवस्थापकस्य सर्वशब्दार्थप्रकृतिरूपत्वेन सर्वस्रष्टुश्च तस्य वेदस्य व्याकरणादीन्यङ्गानि, पुराणधर्मशास्त्रदर्शनादीन्युपाङ्गानि च निबन्धने कारणभूतानि भवन्ति । अर्थादेतयोः अङ्गोपाङ्गयोः सम्यज्ज्ञानं तथा धर्मादिपुरुषसंस्काराः विद्याभेदे कारणभूताः भवन्ति । यद्वा "ज्ञानमेव संस्कार उत्पन्नज्ञाना हि संस्कृता इत्युच्यन्ते तस्य हेतवः"। ताभ्यां ज्ञानसंस्काराभ्यामेव विविधा विद्याभेदा अस्मत्समक्षमुपागता भवन्ति । सर्वशब्दार्थप्रकृतित्वं प्रणवरूपेण वेदस्य ॐकार एव सर्वा वाक् सैषा स्पर्शोष्णभिर्व्यज्यमाना बह्वी नानारूपा भवति । स्पष्टीकृतं च श्रीमद्भगवत्पादैः "ओमित्येतदक्षरमिदं सर्वम्" इति ।[20] घटपटादिनामानि, अध्ययनादिकर्माणि, पृथक्संस्था लौकिकीव्यवस्था-घटनिर्माणं कुलालस्य, पटनिर्माणं कुविन्दस्य इत्याद्युपदेष्टृत्वेन नित्यस्य वेदस्य सर्वकालविदितत्वं स्पष्टीयते भगवता मनुना -

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।**

**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।**[21]

## सन्दर्भग्रन्थाः


- ***उपनिषत्संग्रहः*** : जगदीशशास्त्री, देहली : मोतिलाल वनारसीदास, 1980
- ***ऋग्वेद*** : स्कन्दस्वामी-वेङ्कटमाधव-सायणभाष्यसमेता, डा.वि.आर्.शर्मा, पुणे : वै.स.म, 1988
- ***जैमिनीयमीमांसाभाष्यम्*** : आर्षमतविमर्शिन्याहिन्दिव्याख्यासहितम्, युधिष्ठिरमीमांसकः, हरियाणा : शि.स.क.म, 1977
- ***ध्वन्यालोक*** : श्रामदभिनवगुप्तपिरचित लोचन समन्वितः (प्रथमसंस्करण), गङ्गासागर रायः, वाराणसी : चौ.स.भ, 2004
- ***मनुस्मृति*** : मनुः, मेधातिथिरचित मेधातिथिसमेता, गङ्गानाथझा, देहली : परिमळप्राकाशन, 1992
- ***महाभारत, शान्तिपर्व*** : मूलमात्र, माद्रास : वविल्ला प्रकाशन, 1934
- ***मीमांसान्यायप्रकाश*** : आपदेवकृत, चिन्नस्वामीशास्त्रीसारविवेचिन्याख्ययासंवलित, रामनामदीक्षित, वाराणसी : चौ.सं.सं, 2008
- ***ब्रह्मसूत्रम्*** : गोविन्दानन्द रत्नप्रभाटीका (द्वितीयसंस्करण), पं धुण्डिराजशास्त्री, वाराणसी : चौ.स.सं, 2004


---

[19] वाक्यपदीयम्.1.10,9

[20] माण्डुक्योपनिषद् व्याख्याने

[21] मनुस्मृतिः.1.21

- ***वक्रोक्तिजीवितम्*** : कुन्तकः, सटिप्पण प्रकाश हिन्दीव्याख्योपेतम् (पुनर्मुद्रण), राधेश्याममिश्रः, वाराणसी : चो.सं.सं, 2012
- ***वाक्यपदीयम्*** : भर्तृहरिः, ब्रह्मकाण्डम् (8वां संस्करण), भावप्रदीपाख्यव्याख्या, सूर्यनारायणशुक्लः, वाराणसी : चौ.सं.सं, 2059 संवत्
- ***वेदभाष्यभूमिकासंग्रहः*** : सायणाचर्यविरचितानां स्ववेदभाष्यभूमिकनां संग्रह, बलदेव उपाध्यायः, वाराणसी : चौ.स.सं, 1985
- ***व्याकरणभूषणसारः*** : कौण्डभट्टः, कमला हिन्दीव्याख्योपेतः, कालीकान्तझा, वाराणसी : चौ.कृ.अ, 2003
- ***यजुर्वेदः*** : स्कन्दस्वामी- वेङ्कटमाधव- सायणभाष्यसमेता, डा.वी.आर्.शर्मा, पुणे : वै.स.म, 1988
- ***शब्दतत्त्वमीमांसा*** : वाक्यपदीयगत ब्रह्मकाण्ड के आलोक में, कामदेवझा, कैन्ट वनारस : आई.वी.ए. पब्लिकेसन्स, 2004
- ***सुलभकाव्यशास्त्र*** : भारतीय एवं पाश्चात्य, सुरेश तायडे, कानपुर : चन्द्रलोकप्रकाशन, 2012


***********

PIJSSL